

॥ अथ द्वितीया कला ॥ (२)

॥ श्री शङ्कराचार्यणा मभीष्टम् ॥

॥ किञ्चिद् विशिष्टं तत्त्वम् ॥

(३३) एकं तत् पर सामरस्य मपदं सद् ब्रह्म पुर्णं स्वतः
साकं कारणकार्यचित्समपदं व्यस्तात् समस्तात् सतः ॥
ज्ञानोपासन कर्मयोगपरता योगेन तत्सत्वतः
ब्रह्मानन्दपदे रतिर्हृदि भवेद् अध्यात्मसंविद्धृतः ॥ १ ॥

॥ स्वकर्तव्यतानिर्वहणेन
॥ श्री शङ्कराचार्याणाम् ॥
॥ सत्कीर्तिशेषत्वम् ॥

(३४) भूमौ वैदिकसत्यधर्मविजये तद्वेदविद्योदये
भयोऽध्यात्मसशान्तिशक्तिविभवे योगात् तपो भूतये ॥
भूमब्रह्मणि संविदुद्धृतिकृते योगावतीर्णः प्रभुः
भूत्वा शङ्करदेशिकेन्द्रयतिराट् सत्कीर्तिशेषो बभौ ॥ २ ॥

॥ श्री शङ्कराचार्याणाम् ॥
॥ चत्वारः शिष्याः प्रधानाः ॥

(३५) तस्मै शङ्करपुज्यपादयतये ब्रह्मात्मविद्योच्चये
चत्वारः प्रियशिष्यतां प्रतिययु ब्रह्मानुभावाप्तये ॥
श्रेष्ठस्तेषु "सुरेश्वरः समभवत् सन् "पद्मपादो"ऽपरः
"श्रीहस्तामलकः" सुभक्तिमुदित स्तुर्यो मत "स्तोटकः" ॥ ३ "

॥ एतेषु आद्याः त्रयः शिष्याः शास्त्रार्थज्ञानपरायणाः ॥

(३६) आद्यास्तेषु मता स्त्रयोऽपि सुधियः शास्त्रार्थसंवित्पराः
विद्यायोगपरायणाः कृतधियः सम्पन्नसत्वोच्चराः ॥

आचार्यं प्रतिपेदिरे सुमनसा ध्यानादि सत्साधनात्
आचार्यत्व मपीश्वराद् गुरुवरात् प्राप्तुं स्वभावान्वयात् ॥ ४ ॥

## ॥ तोटकाचार्यस्य वैशिष्ट्यम् ॥

(३७) तुर्यस्तोटक एव केवलहृदा श्रद्धालु रासीन्मुदा
सेवाधर्मपरायणो निजगुरोः शुश्रूषया सन् सदा ॥
दिष्ट्या सोऽत्र गुरोरनुग्रहदृशा सम्प्राप्तया संविदा
दिव्यं सद्गुरु भाव मान्तरदृशा सम्प्राप सद्यो हृदा ॥ ५ ॥

## ॥ तोटक वृत्तेन काव्यरचनया- ॥
## ॥ तस्य तोटक नामकरणम् ॥

(३८) आचार्यो भुवि "तोटकः" समुदितः सन्नुत्तराम्नायके
स्वाचारैः परसद्गुणैः सुमुदितः सत्यः समाम्नायकः ॥
सिद्ध स्तोटक वृत्तकाव्य रचना योगेन सत्त्वात्मना
सत्य ब्रह्म परात्म साम वदनान्नाम्नाऽनुरूपात्मना ॥ ६ ॥

## ॥ हिमालये ज्योतिर्मठे तोटकाचार्य प्रतिष्ठा ॥

(३९) हैमाद्रौ तदुपान्त पादनिकटे ज्योतिर्मठे त्राटका-
मुद्रार्द्रेण सरस्वतीस्वरपदा संस्थापित स्तोटकः ॥
ब्रह्मात्मोपनिषत्प्रचारणपटुः सोऽध्यात्मविद्यागुरुः
ब्रह्मण्यो ऽनुगुणैर्न भूव हि भवान् ब्रह्मानुभावोत्तरः ॥ ७ ॥

## ॥ ज्योतिर्मठे "ब्रह्मानन्दसरस्वती" यतीन्द्रोदयः ॥

(४०) पूर्वं तोटक निष्ठितोत्तरपदे ज्योतिर्मठेऽधिष्ठिते
पूर्वाचार परम्परोच्चरपदे श्री शङ्कराधिष्ठिते ॥
"ब्रह्मानन्दसरस्वती यतिवरो ब्रह्मात्मनिष्ठो भवान्
ब्रह्मेन्द्रोऽभ्युदियाय शान्तिनिकरो ब्रह्मात्मभूमाऽऽत्मवान् ॥

## ॥श्री ब्रह्मानन्दसरस्वतीयतीन्द्रस्य वैशिष्ट्यम्॥

(४१) ब्राह्मीचेतनयाऽऽत्मशान्तिपरया ब्रह्मात्मसत्ताप्तया
ब्राह्म्या ब्रह्मचिताऽऽत्मशक्तिचरया ब्रह्मेन्द्रसत्तात्तया ॥
ब्रह्मिष्ठोदितसाधनादिपरया सत्संविदाऽऽवृत्तया
ब्रह्मानन्दयतिः श्रुतानुचरया ब्रह्मीबभूवोच्चया॥९॥

॥ श्री ब्रह्मानन्दयतीन्द्रशिष्यः ॥

॥ श्रीमहर्षिः महेशयोगीन्द्रः ॥

॥ विजयते ॥

(४२) ब्रह्मानन्दगुरोः सदोपवसतेः सन्दावतः श्रद्दया
ब्रह्माध्यानसुसाधनाद्यनुकृतेः ~~वक्त्याच्च~~ शुश्रूषया वृद्दया॥
हृद्योगेन महेशयोगिपुरुषो मान्यो महर्षिर्भवान्
विख्यातो भुवि दिव्यभाववपुषो योगात् समास्ते महान्॥१०॥

॥ नैष्ठिको ब्रह्मचारी ध्यानयोगी ॥

॥ श्रीमहेशयोगी ॥

॥ विराजते ॥

(४३) बाल्याद् योगतपःक्रियादिनिरतः सन् ब्रह्मचारी भवान्
बाह्यान्तर्यदृशा महर्षिरुदितो योगी महेशो महान्॥
ध्यानाभ्याससुविद्यया प्रमुदितः पीठप्रतिष्ठापरः
ध्याता सन् गुरुदेव आत्मबलतः सम्राजते सद्गुरुः॥११॥

॥ ऋषिकेशे ध्यानविद्यालयप्रतिष्ठापकः ॥

॥ ध्यानविद्यागुरुः ॥

(४४) संसिद्धः स हिमाचले स्वतपसा योगी महेशो गुरुः
संस्थाप्याश्रमसत्पदं सुनगरं श्रीशङ्कराचार्यकम्॥

विद्यापीठपदं सुसाधनपदं तद् ध्यानयोगास्पदं
सन्दध्यायन् ऋषिकेशगो विरमते ध्यानादिविद्यागुरुः॥३२॥

॥ श्रीमहर्षेः ध्यानयोगशिक्षापरायणता ॥

(४५) सन्दधावादिह भारते भुवि भवान् भूयान् त्समग्रे चरन्
भावातीतपरेऽन्तरात्मनि परे ध्याने जनान् योजयन् ॥
स्वानन्दानुभवे प्रशान्तिरसदे ध्यातॄन् समास्थापयन्
स्वान्तर्ध्यानपरोयणो विजयते शिक्षन् समाज् छिक्षयन्॥ ३३

॥ श्रीमहर्षेः ध्यानविद्यायाः- ॥

॥ शिष्यजनान्तरेषु वितरणम् ॥

(४६) ब्रह्मानन्दयते मुखात् समुदितं ब्रह्मण्यतत्त्वान्वितं
ब्रह्मात्मैक्यपरार्थकं सविदितं ब्रह्मानुभावाञ्चितम् ॥
सत्यं सर्वहितार्थकं प्रतिचितं श्रद्धात्मभावाद् ऋजुः
सत्त्वं शिष्यजनान्तरेषु वितरन् आस्ते महेशो गुरुः॥३४॥

॥ प्रत्यक्ष ब्रह्मात्मिका परा वाक् ॥

॥ संविदात्मिका चेतना ॥

(४७) संवेद्या परवाच्य-वाचकचिता सद्वस्तुवाक् सत्त्वका
सम्बोध्या परमात्मसंविदुचिता सत्यात्मसत्तात्मिका॥
सा साक्षाद्परोक्षतश्च परतः सद्वाङ् मुखात् सूच्यते
साक्षाद् ब्रह्म परा सती स्वलसिता वाग् ब्रह्मणैवोच्यते॥३५॥

॥ ब्रह्मणा समाना वाक् ॥

"यावद् ब्रह्म विष्ठितं तावती वाक्"॥ (ऋक्.मं.१०। १ )

(४८) यावद् ब्रह्म परं प्रचेतनतमं तत् संस्थितं व्यापृतं
यावान् सन् पुरुषः सदैव परमः पूर्णः परात्माऽऽपृतः॥

तावत्येव हि वाक् परा प्रतिहिता तद्वाचकात्मान्विता (ऽऽ)
तादात्म्येन परात्मना सुलसिता ब्रह्मात्मनाऽन्वञ्चिता॥३६॥

॥ ब्रह्मात्मिका वाक् चतुष्टयी ॥

॥चतस्रो वाचः ब्रह्मचिच्छक्तयः॥

(४९) ब्रह्मात्मैक परायणाः सुनिहिता वाचश्चतस्रः समाः
सानेच्छाकृतिचेतना प्रकृतयो ब्रह्मात्मचिच्छक्तयः॥
प्रज्ञानादिगुणप्रकाशनकृते प्राज्ञात्मचिन्मूर्तयः
प्रत्ना वाचकशब्दशक्तितनवो वाच्यार्थ-लक्ष्यार्थिकाः॥
॥३७॥

॥ ब्राह्मीचेतनाप्रभृतयः चतस्रो वाग्विभूतयः॥

(५०) ब्रह्मण्यन्तरिता परात्मवचना ब्राह्मी परा चेतना
ब्रह्मण्या भगवत्सुचेतनतना सन्दृक्चिदुन्मीलना॥
तुर्यातीत सुचेतना परतरा सर्वात्मचित्तिस्वरा
तुर्या प्राणनचेतना कृतिपरा वाग् वैखरी साऽक्षरा॥३८॥

(३) ब्राह्मी चेतना प्रथमा परावाक् सत्त्वका॥

(५१) ब्राह्मी वाक् परचेतना रसपराऽऽनन्दात्मसंवित्परा
ब्रह्मेन्द्रात्मचिदग्चना परचिते श्छन्दःस्वरात्माऽक्षरा॥
ब्रह्मात्मोदितवेदमन्त्रवचना संवित्स्वरूपात्मिका
ब्रह्मानन्दसुधारसात्मनिचृते र्योगादरूपात्मिका॥
॥३९॥

॥ सा च अकारणबिन्दुनिकेतना सम्चेतना॥

(५२) सत्यं चित्प्रकृतेरकारणपदं चिद्बिन्दुसत्तापदं
सत्त्वं नित्यविशुद्धचेतनपदं पूर्णं विरामास्पदम्॥
स्वाधिष्ठानपदं प्रचेतनतमं विश्वाद्यधिष्ठानकं
सङ्ख्यामानगुणक्रियादिरहितं सत्ताप्रतिष्ठानकम्॥२०॥

## ॥ ब्राह्मीचेतना स्वरूप तत्त्वविवरणम् ॥

(५३) सिध्दा कारणकार्ययोः समहिता तत्त्वादभिन्नात्मिका
सत्यासत्यविमर्शनादभिहिता सत्यैकतत्त्वात्मिका ॥
भावाभावगुणात् परादधिहिता सा सिध्दवस्त्वापिका
भावातीतपरात्मवस्तुनिहिता ब्रह्मात्मसत्तात्मिका ॥ २१

## ॥ ब्राह्मीचेतनायाः ॥

## ॥ अमात्रात्मकत्वादिकं तत्त्वम् ॥

(५४) पूर्णे ब्रह्मणि संविदात्मनिचिता योगाद्अमात्रात्मिका
प्रज्ञानात्मसुचेतनाऽऽत्मनिचिता माता प्रमात्रात्मिका ॥
मौने वाग्वचने समात्मरसभृद् योमैकतन्मात्रका
ब्रह्मानन्दसुधाप्रसादरसभृद् भूमात्मचिन्मात्रका ॥२२॥

(२) ॥ भगवच्चेतना द्वितीया पश्यन्ती वाक्सत्त्वका ॥

(५५) इन्द्रो विश्वविभूतिवाक् स भगवान् सन् पारमैश्वर्यभाक्
मन्द्रो विश्वजगत्प्रहर्षरसवाग् छन्दः स्वरावर्षभाक् ॥
सन्दृक् कारणबिन्दुसत्त्वकरणात् संविच्चिता विश्ववित्
सिध्दः सर्वगुणक्रियाचितिगते र्ब्रह्मैव सन् विश्वकृत् ॥ २३ ॥

## ॥ भगवच्चेतनायाः तात्त्विकं स्वरूपम् ॥

## ॥ विश्वसृष्ट्यादिविशिष्टकारणब्रह्मरूपम् ॥

(५६) सत्ताभावसदन्वयेन भगवत्सञ्चेतना शक्तिका
सत्या वाचकवाच्यवस्तुनिभवत्सद्भावनावृत्तिका ॥
सा सृष्टिस्थितिसंहृतीष्टकरणा वाग् विश्वमात्रात्मिका
सन्मात्रा प्रथमाऽतिशिष्टकिरणा ब्रह्मात्मदृङ्मात्रका ॥ २४ ॥

॥ भगवच्चेतनायाः विशिष्टं प्रमातृत्वम् ॥

॥ विश्वविसृष्ट्यादेः विश्वमातृत्वम् ॥

(५७) प्राङ् माता परचेतनाऽऽत्मपरतायोगेन सन्मूलिका
पश्यन्ती परवाचका च भगवत्सन्दृक्चिदुन्मीलिका ॥
प्राची जागृतिरत्र तत्र भवती प्रज्ञानचित्प्रापिका
प्रत्यग्दृष्टिरताऽऽत्मना प्रभवति प्रज्ञा प्रतिष्ठापिका ॥२५॥

॥ भगवच्चेतनायाः भारत्याः दृक्स्वरूपता ॥

॥ प्रत्यञ्चि वैश्वानरात्मता ॥

(५८) प्रत्यञ्च्यात्मनि सन्मननाश्रितिपरा वैश्वानरात्मान्तरा
प्रत्येयाऽत्र परावृक्त्वदृक् प्रतिचरा वैज्ञानिकाऽन्तश्चरा ॥
प्राक् प्राणाद्यनुगामिनी स्वरपरा सा वाग् द्वितीयाऽऽन्तरा
पश्यन्ती मनसाऽन्विताऽसुनयना सा प्राङ् मुखाऽऽत्मोत्तरा ॥
॥ २६ ॥

(३) तुरीयातीतचेतना तृतीया अपाद्बिन्दुस्वरूपा ॥

(५९) तुर्यातीतपदा(ऽ)सुचेतनपरा चित्तेरपात् पुरुषे
गायत्री परसत्त्ववाक्चिदपदा वाङ् मध्यमा स्वार्चिषे ॥
प्रज्ञात्मान्तरिता सती स्वयमपात् पादैरतीताऽक्षरा
प्राणेऽस्मिन् न हि पद्यते चितिपरा प्राज्ञे विलीनाऽऽन्तरा ॥
॥ २७ ॥

॥ अपादः सतः पुरुषस्य आत्मनः अपादेव चेतना ॥

॥ तुरीयातीता पञ्चमी । अपाद् वाक् चेतना प्रथमा ॥

(६०) अग्रे सोऽयमपात् परात्मपुरुषः संविद्धतां चिद्धतां
सोऽग्रस्थः प्रथमः परोऽत्र पुरुषः पूर्णात्मसत्ता सताम् ॥
विश्वस्मात् प्रथमाऽऽत्मना च परमा पूर्णा विरामाक्षरा
वैरवर्याः प्रति पञ्चमी हृ चरमा प्राज्ञात्मिका चित् स्वरा ॥२८॥

(६३) विश्वस्मात् प्रथमा भवेत् स्वयमपात् सा पद्धतीनां चितां
विच्छक्तिः परचेतनाऽऽत्मनि पदा नो पद्यते सा सताम् ॥
लक्ष्ये पूर्णपदे परात्मपुरुषे लक्ष्या परोक्षा सती
लक्ष्यालक्ष्य विलक्षणाऽऽत्मनि चिता वाक् संविदा चिद्वती ॥
॥६३॥

(४) तुरीयचेतना स्वराक्षरबिन्दुनिकेतना तुरीया वाग् वैखरी ॥

(६२) वाच्यार्थेषु तुरीयचेतनधरा वस्तुप्रतीकाऽपरा
वाचा तत्र तुरीयया प्रकृतया सद्वस्तु सद्रूपया ॥
वेद्यार्थेन च वाचका समतया सन्दर्शनीयार्थया
वेद्या साऽखिलवस्तुवाचकतया प्राची समस्तोच्चया ॥
॥(६२)॥

॥ तुरीयचेतनायाः वाचः तुरीयात्मनश्च मिथोयोगसम्पत्तिः ॥

(६३) तद्वाचः प्रकृते स्तुरीयपदभाग्-आत्मा परश्चेतनः
सूर्येऽसौ च परोरजाः समुदगात् तस्मै सते ते नमः ॥
वागेवात्मनि वैखरी श्रुतिपदं वाचस्तुरीयं पदं
सोऽसौ प्रापददश्च मामिममदः प्रापं च सोऽहमपदम् ॥
॥३७॥

॥ ॥

॥ ॥

(६४) गायन्त्याः परवाच आन्तरपदं पूर्णं पर ज्यौतिषं
गायन्त्याः परवस्तुवाचकपदं दिव्यं सबाह्यान्तरम् ॥
ब्रह्मात्मैकसुतत्त्वबोधकमिदं तन्नामरूपार्हितं
दृष्टं तच्छ्रुतमित्युपास्यमुदितं ध्यानं तदन्तार्हितम् ॥
॥३२॥

(२) ॥ इति द्वितीया कला सम्पूर्णा ॥

"ब्रह्मसत्त्वचेतना परात्मसन्निकेतना ब्रह्मसंविदात्मना सामेन सत्त्वकेतुना ॥"

दैवतेन्द्रचेतनाचतुष्टयात्मसत्त्वना दैवरातवाक् प्रचेतना मनोऽसुसुस्वना ॥
॥३१॥

॥ अथ तृतीया कला ॥

॥ अग्रिमा विशुद्धचेतना ब्रह्मनिकेतना ॥

॥ अन्तिमा भावातीतचेतना ब्रह्मसञ्चेतना ॥

(६५) "तद् वेदोपनिषत्सु मन्त्रवचनाद् आर्षेयदृष्ट्याऽन्वयात्
तद्वत् तद् व्यतिरेक तत्त्वनयनात् सर्वस्वशास्त्रोन्नयात् ॥
शुद्धादर्शविमर्शनैकविशदं पूर्णात्मशान्तिप्रदं
सिद्धान्तेन "विशुद्धचेतनपदं" पूर्णानुभावास्पदम् ॥ १ ॥

॥ अस्मिन्नर्थे औपनिषदो मन्त्रवर्णः ॥

"अणोरणीयान् महतो महीयान् आत्मा गुहायां निहितोऽस्य जन्तोः ॥
तमक्रतुं पश्यति वीतशोको धातुप्रसादान्महिमानमीशम् ॥"

॥ विशुद्धचेतनापदम् ॥

६६ सूक्ष्मत्वात् तदणोरणीय उचितं सर्वात्मनोऽन्तस्तनं
माहात्म्यान्महतो महीय उदितं ब्रह्मात्मसञ्चेतनम् ॥
सत्तासिद्धविशुद्धचेतनपदं तद् विश्वसच्चोत्तमं
सत्यात्मेन्द्र सुचेतनं परपदं ब्रह्मात्मसत्वं समम् ॥ २ ॥

॥ भावातीतचेतनापदम् ॥

(६७) वैशिष्ट्येन विशुद्धचेतनपदं सन्निर्विशेषात्मकं
विश्वस्मिन्नविशेषतः सममनुस्यूतं चिदेकात्मकम् ॥
भावाभाव-परापरादिविकृतं सत्तैकचिन्मात्रकं
"भावातीतपदं प्रचेतनपदं स सामरस्यात्मकम् ॥ ३ ॥

॥ वाचः चत्वारि पदानि वाच्य-वाचक तत्त्वकानि ॥

"चत्वारि वाक् परिमिता पदानि तानि विदु ब्राह्मणा ये मनीषिणः ॥
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ (ऋक्.सं. १।१६४।)

(६८) चत्वार्यात्मनि वाक्पदानि निहितान्यन्त र्विदु र्ब्राह्मणाः
तेषु त्रीणि गुहाहितानि रहसि प्रत्यञ्चि गुप्तात्मना ॥
वाच स्तत्र पदं तुरीय मुदितं वाच्यार्थ सत्तान्वितं
वाचै वानुकृते र्वदन्ति मनुजा स्तद् वैखरी वाङ्मितम् ॥४॥

॥ वाचः ब्रह्मणश्च समानानि तानि चत्वारि पदानि ॥

॥ आर्षाणि वैदिकानि मन्त्राक्षरपदानि ॥

(६९) दिव्यं पादचतुष्टयं सममितं वाच स्तथा ब्रह्मणः
सन्मन्त्राक्षर सप्तकं समुदगाद् "ओं भूर्भुवः स्वः" पदम् ॥
ब्रह्माग्नीन्द्र ससूर्य दैवत पदं चिज्ज्यौतिषं वाङ्मयं
ब्राह्मी मन्त्रमुखेन वेदविदितं तद् ब्रह्मयशोच्चयम् ॥ ५ ॥

॥ प्रणव-व्याहृति संज्ञकानि तानि पदानि ॥

(७०) ॥ मात्राचतुष्टयेष्टं तदेकं प्रणवाक्षरम् ॥
वाग्भि र्व्याहृतिभिः पदैश्च तिसृभि स्तै र्भूर्भुवः स्वः पदैः
भूतै स्तै र्भुवनात्मकै स्त्रिकरणै र्वेदै श्च देवै स्त्रिभिः ॥
तन्मात्रात्रितयोदितं त्रिवृदितं ब्रह्मात्मसद्व्यापकं
तत्सिद्धं प्रणवाख्य मोमिति पदं वेदं चतुर्मात्रकम् ॥ ६ ॥

॥ तत्प्रणवाक्षरेण ओङ्कारेण ब्रह्मात्मध्यानं उपनिषद्विहितम् ॥

(७१) " ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात् ५
ओङ्कारेण पराक्षरेण पुरुषो धीभि श्चतुर्मात्रया (बृ.उ.)
ध्यायेत् सन्मनसा परात्मपुरुषं ब्रह्मात्मचिज्ज्यौतिषम् ॥
सम्पन्नः स परात्मपूर्णपुरुषे ब्रह्मात्मचिस्फूर्जिते
प्रज्ञानेन विशुद्धचेतनपरो बन्धाद् विनिर्मुच्यते ॥ ७ ॥

॥परमपुरुषस्य विष्णोः चत्वारि पदानि॥[२१]

"एतावानस्य महिमा ऽतो ज्यायाँश्च पूरुषः॥

पादो ऽस्य विश्वा भूतानि त्रिपाद् अस्यामृतं दिवि"

(ऋक्.मं.१०।९०।३)

(७२) विष्णोस्त्रीणि पदानि तानि विविदु ज्योर्तिः पराण्यात्मनः

व्याप्तान्यत्र जगत्त्रये सुमहसा ब्रह्मात्मचित्सत्त्वनः॥

चिद्योगादमृतानि तानि तपसा जानन्ति यत्नात्मनः

पूर्णं तच्च तुरीय मत्र परमं ध्यायन्ति हृद्योगिनः॥८५

॥दिव्यदृशा दर्शनीयं विष्णोः तत् परमं पदम्॥

"तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः॥

दिवीव चक्षु राततम्॥ (ऋक्.मं.१। । )

(७३) "तद् विष्णोः परमं पदं" समुदितं पूर्णं तुरीयं पदं

प्रज्ञानेन सुसन्दृशा ऽऽत्मनि सदा पश्यन्ति ते सूरयः॥

प्राज्ञास्ते परमात्मनि प्रतिरताः सञ्जागृवाँसः समे

सञ्ज्ञानेन समिन्धते समदृशा वाग्ब्रह्मसत्त्वोत्तमे॥९॥

॥तत्परमपदस्य ध्यानादियोगसाधनम्॥

(७४) विष्णो स्तत् परमं प्रचेतनपदं ब्रह्मात्मसंवित्तमं

वेद्यं पूर्णविरामसत्त्वचरमं सत्यं समस्तोत्तमम्॥

ब्रह्मत्वेन विशुद्धचेतनपदे पूर्णामृततास्पदे

ब्रह्मानन्दरसात्मके विरमतां ध्यानेन पूर्णे पदे॥१०॥

॥भावातीतपदे शान्तिरस्तास्पदे विरामः॥

७५ तद्ध्यानेन विशुद्धचेतनपदं तत्त्वेन सम्पद्यते

विज्ञानेनमिजानुभावपरमं सत्त्वेन संविद्यते॥

भावार्थेन तदस्तिताधिकरणे सोमात्मनाऽन्विज्यते

भावातीतपरे चिदात्मचरणे ब्रह्मात्मना युज्यते॥११॥

॥ मृत्यो र्मुक्तये अमृतत्व प्राप्तये त्र्यम्बक रुद्र यजनम् ॥

"त्र्यम्बकं यजामहे सुगन्धिं पुष्टि वर्धनम् ॥

उर्वारुकमिव बन्धनान्मृत्यो र्मुक्षीय माऽमृतात् ॥

(ऋक् मं. ७। । ।)

(७६) श्रीरुद्रं पितरं पतिं त्रिजगतां देवं परं त्र्यम्बकं
सोमार्काग्निदृशं त्रिशक्ति करणं संवित्क्रियेच्छेक्षणम् ॥
प्रज्ञानेन यजामहे त्रिकरणैर्धीयोगसत्त्वेन नः
मृत्यो र्मोचय बन्धनाच्च भगवन् मैवामृता दात्मनः ॥ १२ ॥

॥ अथ गायत्री मन्त्रसाध्या ध्यानयोगविद्या ॥

(७७) ध्येयं ब्रह्म विशुद्धचेतनपरं ध्यानं धिया ब्रह्मणः
ध्येयस्यात्मन एव मानसगुणा सा ध्यानविद्या नृणाम् ॥
ध्याताऽयं हि सचेतनोऽत्र तनुभृज्जीवोऽन्तरात्मा स्वयं
ज्ञाता कामयिता समस्तगुणभृत् कर्ता समस्तान्वयात् ॥ १३ ॥

॥ गायत्री मन्त्रमुखतो ब्रह्मोपदेशाद् ध्यानविधारम्भः ॥

(७८) प्रारब्धं प्रथमं हि वेदमुखतो ध्यानं तदाध्यात्मकं
गायत्री परमन्त्रवर्णमुखतो ब्रह्मोपदेशात्मकम् ॥
सद्विद्याभ्यसनेन संविदुदये ब्रह्मानुभावाद् रसे
साक्षात्कारकृते परात्मनि लये श्रेयःसुनिःश्रेयसे ॥ १४ ॥

॥ ब्रह्मोपदेशाय विहितः ब्रह्मगायत्रीमन्त्रः ॥

"तत् सवितु र्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥

(ऋक् मं. ३। । )

(७९) देवो योऽत्र धियः प्रचोदयति नः सर्वान्तरश्चेतनः
दिव्योऽसौ सविता जगत्प्रसविता ब्रह्मात्मचिच्चेतनः ॥
देवस्यास्य परस्य तस्य सवितु र्ध्येयात्मचित्सत्तनः
ज्योति स्तद् वरणीय मान्तरधिया ध्यायेमहि स्वात्मनः ॥ १५ ॥

८०) प्रत्यक्षं दिवि चित्स्वरूपमुदितं ज्योतिः प्रपश्यन् दृशा
प्रत्यक् सत्त्वधियो निधाय मनसा ध्यायेत् तदन्तर्दृशा ॥
प्रत्यग्घ्यात्मनि सन्निविश्य तपसा ध्येयं परं चिन्तयेत्
स्वात्मानं सुविलापयेत् समदृशा सोऽहंचिता सन्नयेत् ॥१६॥

॥ गायत्री वेदमन्त्राक्षरात्मिका प्रत्यक्षब्रह्मस्वरूपोदिता.
॥ वेदमाता छन्दस्वती वाग्देवता ॥

८३) गायत्री परमन्त्रवाग् रसवती छन्दस्वती सस्वरा
गायन्ती निजवाच्य-वाचकचिता स्वच्छन्दसात्मांशुरा
प्रत्यक्षादपरोक्षतश्च विदता पूर्णा परोक्षोदिता
साक्षाब्रह्मपरा सती विजयते तादात्म्ययोगोर्जिता ॥१७॥

॥ त्रिषु सवनेषु सन्ध्या तद्ध्यानरूपं सदुपासनं शास्त्रविहितम् ॥

८२) गायत्र्याः श्रुतिमन्त्रतस्त्रिषवणे ध्यानं परब्रह्मणः
सन्ध्योपासनयैव तत् त्रिकरणैर्ध्येयात्मसन्धारणा ॥
निष्कामेन हि नित्यकर्मविधिना तद्ब्रह्मकर्मादिना
नित्यं स्यादनिवार्यमेव नियतं साध्यं धियां योगिना ॥१८॥

॥ वाचिकः उपांशुः मानसिकः इति त्रिविधः मन्त्रजपः ॥

८३) गायत्री परमन्त्रवर्णजपनं तद् वैखरीवाङ्मुखाद्
गोप्यं स्यात् तदुपांशुना रसनया वक्त्रान्तरेऽन्तर्मुखात् ॥
गुह्यो मानसिको जपः सुमनसा मन्त्राक्षरालम्बनाद्
ज्ञेयं तत् परमं निजान्तरतमं ध्येयं निजालम्बनात् ॥१९॥

॥ उपनयने ब्रह्मोपदेशानन्तरं तद्ध्यानं व्रतादेशतः प्राप्तम् ॥

८४) पित्रा सद्गुरुणा वटूपनयनाद् ब्रह्मोपदेशात् सतः
प्राप्तं तत् परमार्थसिद्धिनयनाद् ध्यानं व्रतादेशतः ॥

नित्योपास्यतयैव शास्त्रविदितं सर्वार्थसंसाधकं
नित्यानन्दरसात्मशान्तिलसितं सत्यात्मबोधकम् ॥२०॥

॥ गायत्रीमन्त्रस्य ऋषि-देवत-च्छन्दाँसि ॥

" गायत्र्याः गायत्री छन्दो विश्वामित्र ऋषिः सविता देवता "
(ना.उ.)

(८५) गायत्रीयमृगात्मिका स्वरवती सा ऽष्टाक्षरा सैकपाद्
गायन्ती त्रिपदा ऽक्षराष्टकपदैः सिध्या चतुर्विंशतेः ॥
गायत्रं प्रथमं श्रुतं हि परमं छन्दः स्व शास्त्रोदितं
विश्वामित्र ऋषिः, परः स सविता ध्येया परा देवता ॥२१॥

॥ उपनिषदुपदिष्टं "गायत्रीमन्त्रस्य" देवतास्वरूपध्यानम् ॥

" अग्निर्मुखं ब्रह्मा शिरो विष्णुर्हृदयं रुद्रः शिरसा ०— "

(८६) चिज्ज्योतिर्मुख आत्मवाक्स्वरमुखः सन् देवतानां मुखं
गायत्र्याः परसत्त्ववाग्रसमुखः सोऽग्निर्मुखं चिन्मुखम् ॥
ब्रह्मा तन्त्र शिरस्तथाऽत्र हृदयं विष्णुः स सत्त्वात्मकः
रुद्रः शीर्ष-शिरस्वात्मक स्त्रिनयनो मृत्युञ्जय त्र्यम्बकः ॥
॥२२॥

" पृथिवी योनिः प्राणापानव्यानोदानसमाना सप्रणा -

" श्वेतवर्णा साङ्कृत्यायनसगोत्रा ,"

(८७) सा योनिः पृथिवीह सर्वजननी स्यात् सर्वभूताश्रया
सप्राणा सकलात्मदृत्तनु गता प्राणादिचित्संश्रया ॥
सौम्या शुक्लविशुद्धचेतनतनुः सा श्वेतवर्णाऽऽश्रुता
सा साङ्कृत्यायनगोत्रजाऽऽत्मसहजा साङ्कृत्यासगोत्राऽऽश्रिता ॥
॥२३॥

" गायत्री चतुर्विंशत्यक्षरा त्रिपदा षट्कुक्षिः पञ्चशीर्षा -"

(८८) गायत्री त्रिपदा पदैस्त्रिभुवनौ विश्वं मिमाना स्वरा
तत्साङ्कृत्यायन तत्त्वसंहितचतुर्विंशत्युपाख्याक्षरा ॥

षट्कुक्षिश्च विदिक्चतुष्टयतनुस्तत्संहितोर्ध्वाधरा
मध्ये बिन्दुहिता चतुर्दिगुदिता सा पञ्चशीर्षी परा ॥२४॥

॥ उपनयने विनियोगः ॥

(९९) गायत्री विहिता बटूपनयने ब्रह्मोपदेशार्थके (ना.उ.)
गायत्र्या विनियोग आर्षवचने ब्रह्मप्रकाशार्थके ॥
यन्नारायणदर्शितोपनिषदि प्रत्याश्रुतं याजुषे
ध्यानादौ प्रतिगद्यते सुमतिभिः यैर्गाप्तये पुरुषे ॥२५॥

॥ गायत्रीमन्त्रात् पूर्वं प्रणवाक्षर-व्याहृतिमन्त्रयोजना ॥

(९०) गायत्र्या अपि पूर्वतः समुचिताद् "ओं भूर्भुवः स्वः पदं
ग्राह्यं वाक्चरणं चतुष्टययजुर्ज्योतिस्त्रयी बीजकम् ॥
तत्रायं प्रणवाक्षरं परतरं ब्रह्मात्मसद्वाचकं
तस्माद् व्याहृतिमन्त्रकं त्रितयकं यस्तं समस्तात्मकम् ॥
१२६ ॥

॥ तद्योजनेन तेजोध्यानाद्युपासना ॥

(९३) साक्षाद् ब्रह्मपरापराक्षरमुखाच्छन्दःसुमन्त्रोन्मुखाद्
ब्रह्मोपासनमात्मसात्करणतो ध्यानं हृदाऽन्तर्मुखात् ॥
वाचा वाचकयाऽऽन्तरेण मनसा प्राणेन धीभिः समं
संविद्भावनकर्मयोगपरमं चिद्योगिकं चासमम् ॥२७॥

॥ प्रणवाक्षरस्य ऋषिच्छन्दो देवत-विनियोगवचनम् ॥

" ओमित्येकाक्षरं ब्रह्म। अग्निर्देवता ब्रह्म इत्यार्षम्। गायत्रं छन्दः
" परमात्मं सरूपम्। सायुज्यं विनियोगम् ॥ (ना.उ. )

(९२) ओमित्येव मनुश्रुतं श्रुतिमुखाद् ब्रह्मैतदेकाक्षरं
तस्याग्निः परदेवता चितिमुखा ब्रह्मात्मकार्षं परम् ॥
गायत्री परमात्मरूपसलितं छन्दश्च दैवी स्मृता
सायुज्ये विनियोग औपनिषदो ब्रह्मात्म-जीवात्मनोः ॥२८॥

॥ ओङ्कारेण ब्रह्मात्मवस्तुज्ञानेन विहितं तदात्मध्यानम् ॥ २५

"ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात्" इति (बृ.उ. )

(९३) ज्योतिः स्यादवलम्बनं समधियां ध्याने सबाह्यान्तरे

योगे यज्ञपरे च भावनपरे ज्ञाने जपे स्वान्तरे ॥

जाप्यं तत् प्रणवाक्षरं सममते रोमित्यनुज्ञाक्षरं

ज्ञेयं ब्रह्म तदक्षरेण परमं व्योमात्मकाध्यक्षरम् ॥ २९ ॥

॥ तिसृणां व्याहृतीनां ऋषिच्छन्दो देवताः ॥

(९४) तिस्रो व्याहृतिदेवताः समुदिता स्तेऽग्निश्च वायुर्घृणिः

तासां स्यात् स ऋषिः प्रजापतिरसौ सिद्धः समस्तात्मनाम् ॥

गायत्र्युष्णिगनुष्टुभश्च बृहती यस्ते समस्ते श्रितं

ज्ञेयं सस्वरमेव सद्रसपदं छन्दः श्रुतीष्टं स्मृतम् ॥ ३० ॥

॥ गायत्र्याः परब्रह्मणश्च समत्वेन ज्ञानं ध्यानादिसाधनम् ॥

(९७) गायत्री परमन्त्रवाक् समुदिता वाच्येन सद्ब्रह्मणा

ज्ञेया स्वात्मनि सामरस्यमुदिता संवित्क्रियाचिद्गुणा ॥

सत्यात्मान्वयसत्प्रमासुविदिता नित्यं हृदोपास्यतां

सत्यं ब्रह्म तदाप्यतामवगतेः सत्ये सदैवास्यताम् ॥ ३१ ॥

॥ अन्ततः गायत्र्याः प्रथमा प्रार्थना ॥

"आयातु वरदा देवी अक्षरं ब्रह्मसम्मितम् "

गायत्री-ईं छन्दसांमाता इदं ब्रह्म जुषस्व मे ॥

(९६) आयातु प्रति संस्तुताऽत्र वरदा देवी प्रपन्नाक्षरा (ना.उ.)

सत्यं ब्रह्मसुसम्मितं परिततं तद्वाच्यसत्त्वाक्षरम् ॥

गायत्री स्वयमीक्षते रनुकृता माता श्रुता छन्दसां

गायद् ब्रह्म परं पदं प्रियमिदं संसेव्यतां मेऽर्पितम् ॥ ३२ ॥

॥ इति तृतीया कला सम्पूर्णा ॥

ब्रह्मणोपदेशतः श्रुतं बटूपनायने ब्रह्मचिन्तनं चिदात्मना धियां समायने ॥
दैवतात्मतेजसा चिदिन्द्रचित्युपायने दैवरातचेतसाऽऽत्मबाग्रसोपपायने ॥ ३ ॥